च विशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबन्धावच्छिन्नसाधनसमानाधिकरणान्यताभाव-
प्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसमानाधिकरणव्याप्तिरित्यर्थः यत्र हेतुत्वमविशिष्टसाध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैव यदीति ह-
पाटेयत्यपि वदन्ति गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीत्यादिप्रतीतेर्गुरुरूपेणापि धर्मावच्छेदकः प्रतियोगितायाः न चास्याःस्वप्रतियोगिकाभाव-
मात्रमवलंबने तथाविधप्रतीतिः प्रतियोगिताश्रयवत्तादृशप्रतीतेरनुदयात् अत एव केचिद्वह्नित्वेनालेके कंबुग्रीवादिमान्नास्तीति शब्दो न प्रमाणं प्र-
माणं च गुरुसामान्यस्य नचैवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः गुणान्यगुणकर्मान्यत्वविशिष्टसत्त्वादिसमानाधिकरणाभावप्रतियोगि-
तावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेनैवावच्छेदात् न तदवच्छेदकतया ज्ञानां च प्रातिस्विकरूपेण
भावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात् एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यताप्रसंगोऽप्यनुसंधेयः उपदर्शितप्रकारेणापि स्वरूपविचारितत्वे
नद्वैरूप्यत्वात् अत एव ज्ञानगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि साधु संगच्छते इत्यपि केचिद्विदितिकेनापि परिचितेन नन्वेवमिलित-

शिरोमणिः वह्न्यभावाज्जलादौ वह्निर्नास्तीति धियं जनयन्ति त एव प्रमेयं कं संभवति मरणलनसादौ वर्तन्ते तत्र च तेषां समस्तावच्छेदकतया वह्नित्वावच्छिन्नवैयधिकरण्यविनिरूपिका याः
प्रतियोगितास्तत्तदवच्छेदकमेव वह्नित्वमतो व्याप्तिः नचैवं वह्नित्वावच्छिन्नस्य न हृदनिवृत्तत्वात् तथापि तथा सति हृदवृत्ति धूमाभावप्रतियोगितावच्छेदकं हृदावृत्ति
२ त्वावच्छिन्नस्य वह्निमद्योगोलकवृत्तित्वादतिव्याप्तेः अथानुगतं तद्रूपं तत्तदभावप्रतियोगितानां नावच्छेदकं अनवच्छेदकमेव तर्हि अभावप्रतियोगिताया अभावानुरोधा
नाभावात् तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारित्वे तिव्याप्तिरत आह । सामान्येति । संशयस्यासंभवानुपपत्तिं प्रमाणयति । अन्यथेति वायाविति । य
3 द्यपि अयं संशयो न वायुविशेष्यकः तस्य विशेषणत्वेनोल्लेखात् नवा रूपविशेष्यकः तथा सति रूपतदभावयोर्विरोधिनोरेककोटितया प्रकृतानुपयोगात् तथा
पि वायू रूपवांस्तदभाववान्वेति रूपतदभावकोटिकसंशये तात्पर्यम् अन्यस्तत्र एव तद्रूपो नाभावकोटिक इति नाऽभेद इति संप्रदायविदः विरुद्धयोरेकधर्मि
संबन्धावगाहिज्ञानमेव संशयो नत्वतदुभयप्रकारतापि नियता तथा च रूपतदभाव विशेष्यको वायुविशेषणकोऽसाविति तु नव्याः वायुवृत्तित्वतदभावको
टिको रूपधर्मिकएवायं संशयः अपि कुत्रेत्तत्तदभावान्यतरनिश्चयस्यापि तदधिकरणवृत्तित्वसंशयविरोधित्वात् अन्यथा भूतले घटतदभावान्यतरनिर्ण
येपि तु देभूतलं घटवन्न वेति संशयप्रसंगात् इत्यपरे अर्थैतावन्तो वरूपाणी न निर्णेयाः यावद्रूपाऽभावाऽनिर्णये संशयो न विरुध्यत इति चेन्न यावद्रूपाभावा
निर्णयदशायां यावन्तो रूपाभावास्तेषां यावत्त्वेन तेषां यावन्निरूपणिता वदभावानामभावत्वरूपत्वेन तदभावानां वा निर्णयदशायामर्थः नत्वप्रथमद्वितीयौ तथा नि
र्णीतत्वात् नेतरो प्रतियोगितदभावयोर्यो वच्छायानिर्णयेपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनेन तस्याकिंचि
त्करत्वात् नचातिरिक्तसंभावनाविरहस्सहकृत एवाभावनिश्चयस्तत्प्रतिबन्धकः संभावना च तत्पंपार्थिवादित्रितयभिन्नं तत्वेनाप्याकारा निवर्तते चैवं रूपत्वा
वच्छेदेनैतत्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यम् गौरवात् विनाप्यतिरिक्तसंभावनां विशेषाभावनिश्चये सामान्याभावसंशयादर्शनाच्च अथाभावस्य
सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी अन्यथायामव्याप्तिप्रसंगात् सत्वं तप्रकृते अभावस्य यावद्विशेषाभावाधिकरणवृ
त्तित्वेन विशिष्टस्य तदवच्छेदे नचासामान्यावच्छिन्नप्रतियोगिताकत्वं संभवति चेदं तादृशप्रतियोगितायामतिरिक्तत्वात् तेनैनैकविशेषवतो विशेषान्तरा
भाववत्त्वेन सामान्याभाववत्त्वप्रसंगः नच प्रतियोगितावच्छेदकभेदस्याऽभावभेदनियामकतया भेदसिद्धिः प्रतियोगिभेदस्य तन्त्वे एकघटप्रतियोगि
कस्य प्रागभावादिच चतुष्कस्याभेदप्रसंगात् अवच्छेदकत्वमपि यत एव तत्र कचिन्नादात्म्यस्य कचित्संसर्गस्य कचित्पूर्वापरकालीनत्वघटत्वादेस्तथात्वादि
तिवाच्यम् संसर्गप्रतियोगिविशेषणतासाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात् पूर्वापरकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मानाभावाच्च
किंवावच्छेदकभेदस्याभावभेदनियामकत्वं वा तज्जनकत्वं अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात् नापि तद्व्याप्यत्वं वैयधिकरण्यात् अत एव न त
द्व्यापकत्वमपि अभेदेप्यविरोधाच्च नच तदितरावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यं मानाभावात् अत एव च सम
नियतस्थले दुःखादितत्तत्स्वप्रापपरिमाणप्रमादिना धर्मावच्छिन्नो प्यभिन्न एवाभावः भेदसिद्धिस्तु भाववदभावस्य विरुद्धधर्माध्यासादेव अ २
तएव गगनाभावादीनां महदनीनां समनियतानां च धर्माणामेकएवात्यन्ताभावः युगपद्विनष्टानामुत्पन्नानां वा समानदेशानामसति बाधके एक एव ध्वंसः

प्रागभावो देतिं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिताः सर्वैरेव व्यधिकरणधर्मैस्तैस्तैश्च समानाधिकरणैस्तैश्चानन्तै-
रवच्छिन्नानाम् आकाशाभावरूपत्वात् तथात्वमिति चेवम् एवं देशकालाद्यवच्छिन्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा एकस्यैवाभावस्यैव
रूपरूपत्वादिप्रतियोगिकत्वसंभवेन तद्भेदोऽपि विलुप्येत तत्रतत्प्रतियोगिकत्वं तत्तत्स्वभावो न तत्राधिकरणवृत्तित्वस्यानुगमो वच्छेदकत्वं वेति समानम् अत एव सामा-
न्यावच्छिन्नप्रतियोगिताकत्वं वा सम्यग्वृत्तीत्यपि प्रत्युक्तं अव्यासज्यवृत्तेस्तत्तदभावस्यानुपपत्तेः अतिरिक्तकल्पनेच किमपराद्धमतिरिक्तेनाभावेन किंच व्यधिक-
रणयोर्घटपटयोर्द्वित्वप्रतीतिवद्व्यधिकरणानामपि विशेषाभावानामनुगमपदे द्वित्वसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोऽपि स्यात् अपि च घटपानेऽप्येक-
वत्यविषयायामसज्यवृत्तिधर्मस्य ज्ञानेन यावदाश्रयसन्निकर्षेऽपि तत्सामान्याभावात् एवं चैकाभावसन्निकर्षेऽपि सामान्याभावबुद्धिप्रसंगः यावद्भेदेच तस्य ज्ञाने यावदाश्रयसन्नि-
कर्षेऽपेक्षितत्वेन तत्र तेषां तद्भेदस्य ज्ञानमपि तदज्ञाने तद्भेदज्ञाने च तदग्रहात् आश्रयभेदग्रहमेण तद्भ्रमदर्शनाच्च तत्र यावद्विशेषाभावानां प्रथममनुपस्थितिः संभवः(
ति तत्प्रतियोगिनां विशेषणतोऽनुपस्थितेरिति दिक्। केचित्तु तत्र विशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्याव्यासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघ-
वात्सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक एवाभावः कल्प्यते कल्पनीयशरीरस्योभयत्वेऽपि तद्वेलायां तस्य गुरुत्वात् विनिगमनाभावेऽपि सामान्याभावसिद्धिरप्र-
त्यूहैव धर्मकल्पनातो धर्मिकल्पनायां गुरुत्वं कल्पनीयायां नेकत्वप्रत्युक्तं न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानन्तवाद्याद्यधिकरण-
वृत्तित्वस्य कल्पनामपेक्ष्य क्लृप्तानंतकाद्याद्यधिकरणवृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तदव्यासज्यवृत्तित्वस्य च कल्पनैव
लघीयसीति वाच्यम् एवं सत्यभावमात्रः सत्त्वप्रसंगादित्याकूतः यद्वेत्यादि अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादौ व्याप्तिः न च तत्र रूपवत्वादि-
कमेव साध्यं तच्च परम्परासंबंधेन रूपत्वादिकमेव तेन संबन्धेन तदभावश्च तत्पृथिव्यादावितिवाच्यम् रूपादेः साध्यतापत्तेः द्रव्यत्वादिविशिष्टसत्ताद्यभावस्य द्र(
व्यादिवृत्तित्वात् सत्त्वादिसाध्यकद्रव्यत्वादावव्याप्तेश्च अन्यथा विशिष्टतयासत्त्वादेः साध्यत्वेऽपि चारितार्थ्याजातिमत्त्वादावतिप्रसंगात् अन्यादृशेऽपि तेच विशिष्टा-
भावस्य विशेष्यप्रतियोगिकत्वं हित्वा घ्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च अथाऽप्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्यापकत्वं हेतो।
अस्ति चायं रूपादौ रूपत्वादिना नानापृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न तादृशप्रतीत्यादेः रूपत्वादेः प्रतियोगितायामवच्छेदकत्वाभावेऽप्र-
ह्यते न तत्तदभावावच्छेदकत्वं सर्वत्रैवरूपपृथिवीनिष्ठाभावप्रतियोगित्वं तत्रापि रूपेण तदभावादिति अबाधितप्रत्ययात् अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकत्व-
दवच्छेदेन तत्तदभावो प्रकारीभासिद्धेन प्रमेयधूमत्वेन तद्वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात् तदवच्छेदेन तादृशप्रतियोगिताभावस्यापि सत्त्वाच्च अ-
थ धूमत्वेन गौरवेण तत्सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षितं चात्र तथैवेति चेन्न असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि तदवच्छे-
दकं कम्बुग्रीवादिमत्त्वादिना च घटादेः साध्यतापत्तिरिति वक्ष्यमाणदोषः अत एव प्रमेयधूमत्वप्रतियोगितायाः एवं तद्रूपतायामपि नावच्छेदकमित्युक्तावपि न-
निस्तारः अत्र वदन्ति अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वं न चैवं धूमवत्साध्यभेदः तत्र साध्यसजातीयसमानाधिकरणसाधनसजातीयत्वस्याऽत्र च सा-
ध्यसाधनसामानाधिकरण्यस्य व्याप्तित्वेनाभ्युपगमात् द्वयोस्तादृशप्रतियोगितावच्छेदकत्वात् अन्योन्याभावत्वं नाभावयोर्भेदाभेदः इत्यपि कश्चित् अत्र नाभा-
वगर्भत्वसामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह। यत्समानाधिकरणेत्यादिलक्षणद्वयेन प्रथमे एकस्य साध्याधिकरणे शास्त्राधिकरणाल्ला-
घवाद्वितीयलक्षणे अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवत्त्वं तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदक-
त्वादावव्याप्तिः तथापि यद्रूपावच्छिन्नत्वेन तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यं वह्न्यादौ तत्संयोगादौ त-

शि॰रो॰म॰णि॰: ४

दादेर्वा साध्ये सा लाङ्गूलपरयावानुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तदवच्छिन्नत्वस्य च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति यद्यप्यत्र ।
च्छिन्नेयादृशारूपावच्छिन्नमनवच्छेदकमपि निरवच्छिन्नप्रयुक्तसाध्यप्रसिद्ध्यानुपादेयत्वात् । अन्येनादि यद्यप्युक्तरीत्या सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्यन्त
नुधावनस्यावश्यकत्वेन किञ्चित्करमेव तादृशाभावप्रतियोगित्वे तथापि विशिष्टसामानाधिकरण्यरूपाया व्याप्तेर्व्यधिकरणसंबन्धावच्छिन्नत्वमात्रेणासामर्थ्यं व्याप्तिरेवेम(
स्पृक्कालिकीत्यादि अन्योन्याभावगर्भलक्षणस्याव्याप्तिनिरासाय कस्यचिन्नावकाशः निरस्यति नचेति अभेदस्येति तथा च मूले महीरुहो वृक्षो गमसंयोगीनेति प्र
तीतेस्तुभूयमान विशिष्टभेदोल्लेखो यास्य विशिष्टो विनष्टस्यादिप्रतीतिवद्विशेषणाभावविषयतामात्रं कल्प्यते बाधकेबलात् यत्र च विशिष्टभेदेन बाधकं तत्र
त्याप्रतीतिबलात्तत्सिद्धिस्तत्र एवेति नातिप्रसंगः अत्र वदन्ति अभेदस्य भेदाभावस्य त्वाने नवाधकेऽभेदत्वं प्रतियोगितावच्छेदकस्य संयोगात्मना तदभावस्याव्या
प्यवृत्तित्वेन तदनुपपत्तेः यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितानैतदप्रतीतावस्याग्रहाद्भावव्यवहाराच्च स एव तदभावइति कल्प्यते तथा प्रतियो
गितावच्छेदकधर्मग्रहेण तद्भेदान्योन्याभावस्याग्रहात्प्रमाव्यवहाराच्च स एव तत्स्याभावइति निर्णीयते स्थायिको पि वा व्याप्यवृत्तित्वात् अतएव तन्मूलावच्छेदेन कपिसंयो
गिभेदाभावत्वात्तथा संभवादसिद्धेश्च नापि संयोगिभेदस्याव्याप्यवृत्तित्वानभ्युपगमः सिद्धेस्तद्वृत्तित्वस्यैवाग्रहात् नापि कपिसंयोगिभिन्नभेदत्वात् कपिसंयोगिभेदत्वं तद्
दस्याव्याप्यवृत्तित्वेनापि सेत्स्यति नापि मूलावच्छेदेन तत्स्वान्नमः सिद्धेः तेन तद्भिन्नभिन्नभेदस्य तन्मूलमात्रपर्यवसायितया कपिसंयोगिभिन्नभेदात्मनः कपिसंयो
गस्य मूलवृत्तित्वबाधाच्च नहि घटभिन्नभेदो घटत्वादतिरिच्यते आवश्यकत्वे मूलवृत्तित्वेनैवोपपन्नत्वाद्विशिष्टाकल्पनायां मानाभावात् अन्यथा सर्वत्रात्माभावस्याभावो
तिरिक्तत्वापत्तेः अतएव सामान्याभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोरपि सामानाधिकरण्ये तत्त्वं नास्ति विरोधः न चैवं कपिसंयोगवत्त्वापि वृत्तेर्मूलेन कपिसंयोग
इति प्रतीतेरप्यप्रामाण्यापत्तिः यावदायोः समसंख्यातां तद्धेतुप्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुमशक्या नियमतः संयोगवत्त्वेन प्रतियोगिनोऽप्यसि
तेः प्रतियोगिकोटौ तद्वत्त्वेनोल्लेखाच्च मूलेऽवच्छेदेन कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इतिवत् समानविशेषणाभावमात्रविषयत्वेनोपपन्नत्वात् इतिमयोरपि
तिपरास्तम् अन्योन्याभावाधिकरस्य प्रतियोगितावच्छेदकानां समानाधिकरण्येन यास्वस्वप्रतियोगितावच्छेदकसामानाधिकरण्यपर्यवसायिनो विरोधस्य सत्त्वे हि
तत्त्वे न विशेषणेव विश्रामात् अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरव्याधिकरणसामानाधिकरण्यानुभवेन प्रतिक्षेपात्तथा विधविरोध
कल्पनायामनवकाशश्चेति किंच शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिना विशिष्टे तद्बाधादासत्ता विशेषणध्वंसविषयतानुसंयोगीति प्रतीतेर्विशिष्टभे
दमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः न चैवं तु सहस्रेण पिबाधकैर्विरोधरं जनमिति प्रतीतेरङ्गताव नेव नवव्यवस्थापयितुशक्यते ।
न च विशेषणभेद एव तस्या विषयः अग्रेन कपिसंयोगीति प्रतीत्यापत्तेः युज्यते चाव्याप्यवृत्तिरन्योन्याभावः कथमन्यथाव्यक्तेनादर्शनाऽयोग्यादाववयवनशानमो हेतोः
द्विनाशसमये च चैत्राद्यो नाय तदणुवानित्यादयो व्यवहाराः न चात्र विशेषणसंसर्गाभाव एव विषयीयते अनुयोगिनि सप्तमी विनानदनुपपत्तेः न चैवं तु मूलेन
वृक्षस्तदासीनिकदाचिदपि वृक्षसंसर्गाभावं बोधयतीति तथात्वे वाधुदोऽवतंदादुपत्यादेरपि प्रसंगात् अपि च विशिष्ट एव चाक्षुष कदाचिदपि देशो यथा घटो पसर्जन तयोपस्थित
स्यादेः कथं प्रतियोगित्वेनाभावेऽन्वयः इतरविशेषणत्वेनोपस्थितस्य निराकांक्षत्वतयान्यत्र विशेषणत्वेनान्वयायोगात् न च विशिष्टबोधकपदं विशेषणमा
त्रपरं तथा सति चैत्रो न दण्डी घटो न श्याम इत्यादेरपि दण्डादिसंसर्गाभावप्रतीत्यापत्तेर्दुर्वारत्वात् एतेन नञ्भावबलात्तिकतया दण्डिवसप्तमी मन्वय समर्थन
प्रत्युक्तं एवं च चैत्रो न पचतीत्यादावाख्यातार्थकालकृत्यात्मपि चोपस्थितस्य कृत्वे रेवभेदोभासनादसत्त्व वृत्तेन तत्तु न पचति चैत्रो न देवदत्तः इत्यादौ विभक्त्यर्थस्य
तिसंबन्धादेरभावस्य बोधनेन ज्ञानसप्तमीनापेक्ष्यते ऽपेक्ष्यते च प्रातिपदिकार्थसंबन्धे तिनिङ्गणेऽनुपपादयिष्यामः नञ्च वैधर्म्येपर तयान्यघटपटमान्नादेः घटपटमादि

रामः ४

विधर्म्मेत्यर्थः चैत्रमैत्रत्वाकाशत्वादिकमेव यथाक्रमाचार्याः ष्पामाङ्को विधर्मान्तत्वमपि गिती यपि वदन्ति निरुक्तं पञ्चवितेन संबन्धितेनैवेति निरूपिततत्वमेतल्लक्ष्योतिद्रव्यं चानवु
गतायाश्चापि व्याप्तेर्नानियम्यात्तुमिति हेतुसत्त्वावस्थाने एतेन प्रत्यक्षाभावान्योन्याभावगर्भे ताहशेति नन्वद्वित्वादिकं किं प्रतियोगितावच्छेदकमेव न भवति किं वा भवत्येव परं तल्लक्षणानामेवास
समानाधिकरणतत्तद्धर्मावच्छिन्नप्रतियोगिताकानामभावानां ताहवादित्यभिप्रायः नाद्यः एकैकाभाववती निःताद्वयेन नास्तीति प्रतीतेर्विलक्षणत्वात् घटाद्यादिना द्वयं नास्तीति निश्चयेपि
केकाभावसंशयात् विषयाद्यनुगमं विनानुगतप्रत्ययायोगात् न चाभावस्य वृत्त्याधिकरणप्रतियोगिकत्वमात्रं वृत्ति समानाधिकरणधर्मावच्छिन्नप्रतियोगिकत्वं वा द्वयं नास्तीति प्र
तीतेर्विषयः ताहशवृत्त्याधिकरणव्यक्तिविशेषविरहिणि तथा तिघटभयवालिनि ताहशोद्वयं नास्तीत्यप्रत्ययात् वृत्तिसामानाधिकरण्याभावेपि प्रतीतेरनुरागाकारत्वाच्च अत एव
नेताहशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं अत्यन्तुकल्पनात्तत्तले विलक्षणपरयोन्यत्वमनुगतप्रत्ययात् न च परंपरासंबन्धेन ताहशवृत्तित्वसामान्याभाव एव
द्वयेन नास्तीतिप्रतीतेर्विषयः वृत्त्याधिकरणयोरेव प्रतियोगित्वेनोल्लेखात् वृत्त्यादेर्वृत्त्यादि वृत्तिमत्त्वानवस्थितावस्थानतः शब्देनाभिव्यपरयोन्यत्वस्मादिभ्रमत्ययाच्च अत एवैकविशिष्टा
परामावोपि न तद्वात्वमत्र नैवविरुद्धयोरपि जलत्वपृथिवीत्वयोर्वृत्तेनाभावप्रत्ययादित्युक्तत्वाच्च नान्यः तथात्वेपि साध्यतद्भावत्ताहशाभावप्रतियोगितानपायात् अन्यतरत्वा
भावान्तरमैकैकत्वद्वत्वतिजायमानायाप्यत्र किंचिद्द्वयवत्त्वावच्छिन्नद्वयमानाया वृत्तौ न स्तइतिप्रतीतेरुपपादयितुमशक्यत्वादित्यत आह अभ्युपगमेवेति उभयत्वमेव प्रतियोगि
ताकेच्छेदकं न तु साध्यताच्छेदकं साध्यवत्वं वेत्यर्थः अत्रच साध्यतावच्छेदकत्वाभोपि लक्षणे न च्चैव विवक्षितमिति भावः वेद्येति साधनताभिमतं तथाच साधनसमानाधिकरणात्यं
ताभावप्रतियोगितावच्छेदकाया वृत्तो धर्मा यद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः एतेन सर्वत्र ताहशे यावद्विवक्षि
न्नस्य ताहशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसंजकाया यच्चाद्यावच्छिन्नप्रतियोगिताकाव्यतिरिक्तसामाभावस्याप्रसिद्धिः ताहशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरण
स्याप्रसिद्ध्या श्रसत्त्वात् यादिसाध्यकपृथिवीत्वादावव्याप्तिश्च कापिरूपादिवान्नो ताहशयावदभावसामानाधिकरण्यासम्भवादिति प्रत्युक्तं सर्वत्र सोपाधौ तेकव्यक्तिकस्य सम्भवतो प्युपाधेः
धर्मान्तरविशिष्टत्वादिनाऽभावोभवत्येव साध्यसमानाधिकरणस्यवच्छेदकत्वसम्भवात् साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूपसामान्याभाववत्त्वावच्छिन्नप्रतियोगिताका
यावत्तोऽभावा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः अभावस्याभावभिन्नोग्राह्यः तेनेदं जलं वह्निमद्वत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रति
योगितावच्छेदकरूपसामान्याभाववत्त्वावच्छिन्नप्रतियोगिताकाभावानामेकलक्षणाणामनलत्वसामानाधिकरण्यविरहेपि नाव्याप्तिः द्रव्यत्वं सोढुं सत्वात् इत्यादौ च द्रव्यत्वं सत्वादेस्तत्त्वका
रकप्रमाविषयत्वादेर्वाभावाभावत्वेहेतिरिति कैश्चिदभावत्वादृशेन द्रव्यत्वसत्वादिसमानाधिकरणत्वे तिनाव्याप्तिरित्यपि वदन्ति । यावदिति सव्यभिचारिणे तेषां याभावानां व्यभिचारिणां साध्ये
नसामानाधिकरण्यमित्यर्थः यावदिति यत्पदं साध्यत्वाभिमतपरसोपाधिकृतरणाय यावदिति तु सप्तमीकस्य द्वितीयात्यन्ताभावस्य विशेषणं तथाच साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगि
ताकात्यन्ताभावत्वव्यापकत्वे सामानाधिकरण्यसामान्याभावकत्वमर्थः केवलान्वयिस्थले ताकाशादौ तत्र यावदिपोऽभाव प्रसिद्ध इति सम्प्रदायः केचित्तु ताहशयावदभावस्य मत्वर्थ यदधिक
रणतायाव्यापकत्वमित्यर्थः न च ताहशप्रतियोगितानवच्छेदकत्वेन मेयत्वावच्छिन्नविशेष्यतावत्ताहशघटाघटयोरधिकरणतायाव्यापकत्वमिथ्यात्वाभावेन समं भावहेयोपादानमन तिप्रयोज
नकमिति वाच्यम् यावतां ताहशाभिधानाद्दीनामेकाधिकरणस्याप्रसिद्धेः नचावच्छेदकाप्रमानुपादाय प्रतियोगितावृत्त्या व्यवच्छेदनविशेषणानां साध्यव्यापकव्यापिरूपान्तरेण साध्यसमानाधिकरणत्वं
तु भावप्रतियोगित्वसोपरदर्शितत्वादित्याङ्ः साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदके यावन्नियतसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेनाभिमतस्य सम्पदेशतिन्यायः अव
च्छिन्नसामानाधिकरण्यसामानाधिकरण्यावच्छेदकरूपं वाव्याप्तिः इत्यं चैत्रमनद्रव्यत्वत्वादेर्व्याप्यावच्छेदकत्वं निघ्नत सर्वेवर्तिनावच्छेदकधर्मात्मकेकारणानावच्छेदकत्ववदन्यदेवेति इयद्धि
गौतुपहितमेदादासमर्थनीयं तत्राह्यमभिप्रेत्याह । यत्संबन्धिनेति । का संबन्धिता सामानाधिकरण्यस्यापाजनकत्वादियाह द्वन्द्व अत्र चादिविशिष्टसत्ताबावच्छिन्नगुणादिसमानाधिकरणस्य
त्वादेः कर्मादीपरामर्शात् गुणादौ तु मिति व्यापत्तिः साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तु पक्षे साध्यनिर्णायकाप्रागसम्भवी तन्तुशयेन द्वितीय अयमालोकोऽयमधिवेत्यादौ विशिष्यसंदे
हेपि सामान्यतोवच्छेदकरूपवत्तानिर्णयः संभवत्येवेति द्रष्टव्यम् अत्र चावच्छेदकत्वं नान्यूनवृत्तित्वं अन्यूनानतिरिक्तवृत्तित्वं वा वह्न्यादौ साध्ये मेयत्वादावतिप्रसंगात् प्रमेयत्वादावप्रसंगाच्च किं
त्वनतिरिक्तवृत्तित्वं तच्च स्वाश्रयवृत्तितदभाववदवृत्तित्वं गुणवत्सत्त्वादित्यत्र सत्तात्वेऽतिप्रसंगात् न च कर्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभाववत्वात्सत्ताया न च वर्तमानत्वात्तथात्व
स्यातिविशिष्टसत्तात्वेशाक्यदर्शितदिशा व्यभिचारादावव्याप्तिप्रसंगात् तथापि निष्क्रियत्वधर्मविशिष्टवृत्तेनाधिकरणवृत्तित्वेनावृत्तेनेत्यं साध्यसमानाधिकरणवृत्तिसत्तविशिष्टाधिकरणवृत्ति

प्रितेम
लि:
५

त्वं नवर्त्ततेतत्त्वम्. साध्यासमानाधिकरणाहृत्तित्वविशिष्टाधिकरणाहृत्तित्वसामान्यकत्वं तत्त्वविशिष्टाधिकरणाहृत्तियावत्साध्यासमानाधिकरणकत्वं चेति तत्फलितार्थः सत्तात्वविशिष्टसमाधि
करणकर्मादिहृत्तित्वस्य साध्यासमानाधिकरणे कर्मत्वादौ सत्त्वान्नातिप्रसंगः कर्मान्यत्वविशिष्टसत्ताश्रयस्य नकर्मादिरितिनातिप्रसंगः एवं च मेयत्वादेरपि केवलान्वयिनः सामानाधिकरण्यावच्छेदक
त्वोपपत्तिः यत्तु हृत्तिमत्तादिकमेव तत्र व्याप्तिस्तत्र उक्तं तु मेयत्वादिनेति तत्र आत्मविशेषहृत्तित्वयाः गृह्यमाणेन रूपेण व्याप्तिग्रहासंभवात् अन्यथातिप्रसंगात् साध्यतावच्छेदकसंबंधेन साध्याधिकरणे ये ये
न संबंधेनावर्त्तमानत्वहेतुतावच्छेदकसंबंधेन हेत्वधिकरणेपि तेनैवतत्त्वात्केव्याप्यम् नीलघटत्वादेर्वा रूपीयदेव स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वे विशेषणीयसामानाधिकरण्यापादानाद्व्यभिचा
भावत्वादिसंग्रहः तदवच्छिन्नत्वं च तद्विषयप्रतीतिविषयत्वस्वरूपसंबंधविशेषणतावच्छेदकत्वम् अतएव नघटत्वसमवायावच्छेदकमित्यादिकमपि संगच्छते अन्यथातिप्रसंगेऽनतिप्रसक्तत्वस्याप्रसक्तेर्वे
नत्वनिराकरणायोगात् विरुद्धयोर्भावाभावयोरधिकरणैकत्वे केनसंबंधेनवृत्तिर्निर्दिष्टव्या अतस्तन्मावच्छेदकमेवापेक्षा अतएव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपाद
नायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्याः संगतं तु गुणाभावस्य गुणत्वव्याप्तिसामानाधिकरण्यावच्छेदकं विरोधात् अव्याप्यत्वेऽप्येकपिसंयोगादेरधिकरणेहृत्त्यत्वोत दभावस्य
संयोगेन चैवरूपादेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात् वह्निमतिसंयोगेनवर्त्तमानस्यधूमादेर्धूमाभाववति स्वावृत्ति संयोगेनावर्त्तमान
त्वात्तु तदवच्छिन्नत्वधूमत्वादेर्नसाध्यसामानाधिकरण्यावच्छेदकत्वविरोधः व्याप्तिग्राहकीरप्रतिव्याप्तिवृत्तितोपि न्यत्वनद्धर्मविशिष्टस्यसाध्यानाधिकरणाहृत्तित्वग्रहे तदवच्छेदेन साध्याधिकरणाहृ
त्तित्वग्रहायोगात् अस्तु वेतन्मतेहेतुहृत्तिधर्मस्यसाध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः तद्धीश्च साध्याहृत्तिधीर्व्यभिचारत्वेनधीस्तु परंपरयेति नीलधूमत्वादिकं तेनैरूपत्वात्
तावच्छेदकं एवं वस्तुतु घटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः न तु तत्सहचरितं तु गुणीवादिमत्त्वादिकं तेन च गृह्यमाणेन रूपेण व्याप्तिग्रहे तत्प्रयोग्ये तेनानुपपत्त्यासेवान्वयोः प्रको
शत्वाव्याप्यत्वादिनामपि समानः एवं द्रव्यरूपादसाधिकरणत्वादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यादिसाधारणगुणासमवेतत्वेनतिद्रव्यसमवेतत्वस्य च रूपस्यावच्छेदकत्वेसमवेतद्
नात्वादीनामपि नतत्त्वविरुद्धधर्मद्वयाधिकरणत्वेऽपि कस्यचित्केनसंबंधेनहृत्तौ कथंविरोधः कथंवाव्यत्वादौ साध्ये हृत्तेन विशिष्टाहारपादेश्च प्रयोगः न चापरामर्शाहारमितिरिति नुविभावनीयम्
न्यपरंतु यद्धर्मविशिष्टहेत्वधिकरणेन साध्याधिकरणतायाअवच्छेदकं सधर्मोव्याप्तिः एवं तु धूमस्यधूमवत्तेरूपमत्वेधूमवन्तवह्नेस्तु तद्विमत्वात्विसादिग्रकाणवाव्यवर्त्तः अत्रचावच्छेदकत्वं न स्वरू
पसंबंधविशेषः विरुद्धदिक्कालानवच्छिन्नहृत्तिकस्यन्यूनदेशकालहृत्तिकादेश्चाधिकरणतायां नदसंभवात् तुल्यहृत्तिकधर्मद्वयाधिकरणतयोर्मिथोऽवच्छेद्यावच्छेदकभावस्यचानियतत्वमशक्यत्वात्
नाप्यन्यूनहृत्तित्वं न्यूनहृत्तिकधूमादेरव्याप्यतापत्तेः किं त्वनतिरिक्तहृत्तित्वं स्वान्यूनहृत्तित्वमितियावत् अतोनकेवलान्वयिन्यव्याप्तिः अत्रचेयत्वन्यूनहृत्तिसाध्यं तत्स्वव्यापकमवच्छिन्नम्
यवस्तुनमपेक्ष्यगौरवपरमवशिष्यते नत्वग्रन्थकारएवाग्रे विवेचयिष्यतीत्याहुः। उपाधिनेति विशेषणतयापन्नेनोपाध्यन्तर्वेशेनेतियावत् वह्न्यादावार्द्रेन्धनप्रभववह्नित्वेनरासभार्द्रेन्धनादौ तथा
विधवह्निविशिष्टत्वेन धूमसंबन्धेऽवच्छिद्यमानेनतथाविधवह्नेरप्यनुप्रवेशाद्रासभत्वादिकंन्वितिविशेषेन नचान्यदेनन अत्रचेदंतत्त्वं हृत्तिः स्वेदंवास्पर्शादित्वअवैनाप्युपाधित्वप्रवृत्तस्यस्पर्शत्वेनस्पर्शान्यत्वेनवा
साध्यासमानाधिकरणतयासाधनव्यापकतयावास्वयमनुपाधिनाकेवलेन विशेषणीभूयवा स्पर्शान्यस्पर्शत्वेनचोपाधिनास्वतोवच्छेदकसाध्यसंबंधोऽवच्छिद्यतेऽनुपाधिनैवेति नियमेनतात्पर्यं परंतु स्व
रूपसाधनतावच्छेदकस्यानवच्छेदकतामात्रेयत्नएवसोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकमतएवतद्धिशेषणत्वोपाधिरितिनिवदन्तीत्याहुः। अतएवेत्यादि अत्रावच्छेदकत्वं सामानाधिक
रण्येनतत्त्वंचान्यूनहृत्तित्वव्यापकमितियावत् तच्चाधिकरणाभावेनानेनसाध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवृत्तव्यापकताधिकरणताकत्वपर्यवसन्नं निरुक्तविशिष्टसाधनव्यापकत्वमिति
तन्निष्कर्षः इत्थं च समवायेनकार्यत्वहेतुकत्वनिष्ठद्रव्यत्वादिसामानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनिवृत्तत्वादौनातिप्रसंगः न चाद्रव्यजन्यत्वेसतिसत्त्वादिमत्वादौ द्रव्यत्वविशिष्टसत्ताद्यव्या
पकस्पर्शवत्त्वादावप्रसंगः निःस्वेदस्पर्शात्तद्रव्यं सत्त्वादिमत्वादौ पीतस्पर्शेनस्वरूपान्यत्वादिकारणायत्नत्वादितत्र साध्यविशिष्टसाधने विशेषणं साध्याभावविशिष्टसाधनात्यन्तासामानाधिकरण्येनव्या
वर्त्तकं साध्याभावविशिष्टत्वनिरुक्तसाधनवद्वृत्तीतियावत् एवं च द्रव्यं सत्त्वादित्यत्रसत्ताया अभेदे विगुणकर्मान्यत्वेनाव्याप्तिः नापिद्रव्यंकर्मान्यत्वेसतिसत्त्वादित्यत्र गुणान्यत्वादौ इत्थं च साधनता
वच्छेदकस्यानवच्छेदकत्वेहानतनायपरंतद्भिन्नत्वमुक्तेनत्वविवृत्तिमेवतत्र वैयर्थ्यात् इदं दधिजनं वादभङ्गादौ दधित्वाव्याप्तेश्च यद्वा प्रकृतसाधनतावच्छेदकानवच्छेद्यप्रकृतसाधनवि
शिष्टसाध्यसंबन्धितावच्छेदकत्वं सर्वदलार्थः अनवच्छेदकत्वं च तत्साध्याभावविशिष्टसाधनत्वहृत्तित्वयातद्विशिष्टसाधनस्यसाध्याभाववद्वृत्तित्वेनसाध्याभाववद्वृत्तिविशिष्टसाधनव ५
त्त्वेनेतियावत् एतेनधूमवान्मेयवत्वादौ मेयावच्छेद्यसाध्यासंबन्धाप्रसिद्धिः गुणादन्यत्वकर्मान्यत्वेसतिजातिमत्वादिसादौ जातित्वघटकनित्यत्वादेर्वैयर्थ्येनविशिष्टस्यान
वच्छेदकतयागुणकर्मान्यत्वादेरुपाधितावशिष्टेतिनिरस्तम् अवच्छेदकत्वं च सामानाधिकरण्येनतथा चसाध्यविशिष्टसाध्यसंबन्धितानवच्छेदकसाधनतावच्छेदकावच्छि

5

छिन्नसाधनस्य व्यापकत्वमर्थः पर्यवस्यति उपदर्शितधीत्वस्पर्शाभावादिवारणाय तत्रेत्यादि तत्र साधनतावच्छेदकविशिष्टे साधने विशेषणं साध्यस्य व्याप्यत्वेनौपाधिकं यत्सामाना-
धिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभाववन्निवर्तते इति यावत् तथा च साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामान्यसाध्यविशिष्टप्रकृतसाधनाधिकरणसामान्यस-
व्यावर्तकमिति तु समुदायार्थनिष्कर्षः केचित्तु विशेषणेन समानाधिकरणं तथा च सामानाधिकरण्यं च व्याप्यतावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति याव-
त् अवच्छेदकत्वं चेहान्यूनानतिरिक्तवृत्तित्वं गुरोः पुपाधिसामानाधिकरण्यस्यानतमेव यद्यपि [illegible] नित्यद्रव्यत्वादि [illegible] समवेतत्वस्यचव-
त्यमानत्वलक्षणाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनातिरिक्तवृत्ति तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्यैव हेतुनिष्ठं यत्सामानाधिकरण्यं न्यूनान-
तिरिक्तवृत्ति तत्र विवक्षितं सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्य च तन्निष्ठकर्मान्यत्वसामानाधिकरण्येन तिरिक्तवृत्तित्वेन तदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् पृथिवीत्वादि
सामानाधिकरण्यं च न्यूनवृत्ति जलादौ तदवच्छेदकावच्छिन्नस्याभावप्रतियोगित्वात् साध्यव्यापकानां सन्देहात् उपाधित्ववारणाय साधनतावच्छेदकभिन्नेनेति तदनवच्छेद्यार्थकमित्या-
हुः ननु सर्वत्र सोपाधौ सर्वत्रोपाधिना साध्यसंबन्धोऽवच्छिद्यते इति नियमः अयं प्रत्यक्षोऽन्यत्वादित्यादावुक्तरूपत्वादेस्तत्संभवादित्यत आह अत एवेति यत एवोक्तरूपत्वादेर्न तथा-
त्वसंभवः अत एव तत्र लाघवान्नियमवादिमते इदं लक्षणमिति साधनाव्यापकत्वमित्यस्य साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं [illegible] साधकसामानाधिकरण्यपर्यवसि-
तेनेनोक्ताङ्गुतरूपवत्त्वादौ नातिप्रसंगः अथ प्रत्यक्षत्वद्रव्यत्वादिमादौ हेतुत्वादावतिव्याप्तिः साध्यव्यापकत्वेन विशेषणे च सध्पामोभित्रानेयत्वादिमादौ शाकपाकजत्वादौ व्याप्तिर-
न उक्तसाधनावच्छिन्नेत्यादिसाध्याभावसंबन्धिनि विरुद्धसाध्यसंबन्धस्यावच्छेदकभेदं विनाऽनुपपद्यमानस्यावच्छेदकीभूतोपाध्यादेरनुपाधिकत्वं तदसमर्थानां चोपदर्शितोऽ-
नुपपत्त्यादीनामुपाधिः संभवतीत्याह व्यभिचारिणीति व्यभिचारः सपक्षविपक्षवृत्तित्वं अथ विपक्षगामित्वरूपव्यभिचारोऽन्वयनमेवोपाधिफलं तन्मते नरूपादीनामव्याप्तिरित्याह अत
एवेति यत एव साध्यसंबन्धितावच्छेदकरूपं व्याप्तिः सोपाधौ तस्याभाविकत्वेतावच्छेदकत्वं साध्यसंबन्धितावच्छेदके अत एव सर्वोपवर्णितं समानाधिकरणे व्यभिचारिणि हेतौ सन्निष्ठ
साध्यसंबन्धितावच्छेदकरूपलक्षणा व्याप्तिः संक्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्यैरनुमन्यते इत्याह अत एवेति साध्यस्य तत्राव्युपाधिव्यावदर्शरूपेणोपाधिकरूपस्य व्याख्यातयो-
रुपाधिपदस्य योगरूढित्वव्यवस्थापनेन निराकुरुते लक्षणमिति लक्षणरूपेणौपाधिकरूपं साध्येति अत्र साध्यव्यापकत्वमात्रं विवक्षितं न त्वनेन साधनवति न ह्यतिरेकेण साध्यव्यतिरेको
न्वयनसंभवात् साधनवति व्यापकनिवृत्त्या साध्यसाधनसंबन्धनिवृत्तिसिद्धाविष्टा साध्यनिवृत्तिः सिध्यतीति प्रकारान्तरं दर्शनाय यत्तथाविधोक्तिः व्याप्यत्वे नन्वहेतुरुपाधिस्वव्यवहारं नि-
रस्यायोगेनाधिकरणेनोतन्निरस्यति विषमेति प्रवृत्तिनिमित्तं यौगिकं व्यभिचारोन्नायकत्वमेवेत्येवकारेण योगानादरं दर्शयति उपाधित्वमुपाधिपदप्रवृत्तिनिमित्तमनुपाधित्वोपाधि-
र्वा नायोगादेव लाघवात्साध्यव्यापकतामात्रे रूढिरिति भावः व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तद्ग्रहोपायमभिधातुमुपक्रमते अभावकरमत्रपर्यटयति
सेयमित्यादिना दर्शनानां प्रत्येकं वा सहत्वं मिलितानां वा मिलनमपि स्वरूपतो व्यापारतो वा आद्ये दर्शनानामिति द्वितीये आद्ये इति क्षणिकानामपि स्थिरतामस्थिरतामपि सहोप-
न्नानां मिलनमस्तीत्युभयमनुपपन्नं तदीयं साशंकं निराकुरुते नचेति व्यापकसाध्यसामानाधिकरण्यस्य प्रथममेवागृहीततादृशग्रहीतव्यापकताश-
ग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वं वाच्यं तत्र संभवति भिन्नविषयत्वादित्याह समानेति भ्रमस्य गृहीतमेवेदं ज्ञानद्वयं नत्वेवैशिष्ट्यावगाहीति भावः न तथा न व्याप्तिग्राहकं व्यभिचारद-
र्शनव्यापारतया सहकारि व्यभिचारादर्शनसहकृतसर्वकम्पत्वात्रिया सहकारीभूतो दर्शनं तु कदाचित्कं व्यवहारादुपयुज्यत इति निर्गलितं नैयायिकमतमाशंक्य निराचष्टे नचेवमि-
ति जातमात्रस्येति तथा च तन्मूलकोऽपि न रयस्यात् [illegible] तकोऽवतार इति भावः नहीति नत्र व्याप्तिग्रहसंभवति तर्कोदिस्तत्र स्मरणमिति नत्र व्यभिचारावकाशः विनानुभवं स्मरणस्यायोगा-
त् नच जन्मान्तरीणः सः जन्मान्तरे विपर्यनुयोगानादवस्थानात् अनादित्वेन परिहारः परतो विज्ञानयिष्यते नचेति नानाभावानां [illegible] सिद्धेः यदि वा गृहीतस्य गृहीतस्य शेषवर्जि
संसर्गस्य वा प्रमाणसिद्धेः प्रसंगस्य दाप्रये वर्णितिनिनकृतोपपन्नतानतुमामान्यत्वेनेत्याह नतिति साध्याव्यापकत्वे साध्यसमानाधिकरणाभावप्रतियोगित्वं न [illegible] साध्याधिकरणैकव-
क्तिवृत्तित्वेऽपि तथा दृश्यमानस्य तादृशावगाहनाग्रहं विना न संभवतीति भूयो दर्शनापेक्षा तदाहितः संस्कारो वहिरिन्द्रियमात्रस्य सहकारी मनसो पि वा आद्ये मनसोऽपारवश्येति द्वितीये नापीति

6

परिशेषात् साध्यसाधनसंबन्धग्राहकातिरिक्तानपेक्षग्राहकत्वात् उपाध्यभावग्राहकसापेक्षत्वाच्चाश्रयासिद्धिं निरस्यति तथाहीति उपाधिस्मरणइत्यादि नन्वेवमसन्निकृष्टादिहेतुकानुमिति
र्न स्यात् उपाधियोग्यानुपलम्भविरहादित्यत आह तद्व्यवहारेति तथा च तद्व्यवहारस्य हेतुरेवानुमितेरपि हेतुः तच्च उपाध्यभावत्वेन ज्ञानं उपाधिस्मरणइत्यादिना तत्कारणप्रदर्शनपरं अभाव
त्वं चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपविशेषो ऽतिरिक्तः पदार्थो वेत्यन्यदेतत् एवं चोपाध्यभावत्वेन ज्ञाने ऽधिकावेदनं व्यवस्थाम इति भावः व्याप्तिस्वरूपे संशयाभावमापाद्य तेनिरुपाधि
संबन्धत्वरूपव्याप्तित्वेन वा ग्राह्ये इष्टापत्तिः द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्समवधाने सति संबन्धग्रहे ग्राह्ये किं विद्यमानइति तथा च तदग्रहमात्रेण तत्तदभावत्वेनापि ग्रहइति समा
नप्रकारकनिश्चयाभावात्संशयो नानुपपन्नइति भावः द्वितीये त्वा न प्रामाण्यमिति प्रथममिति तत्सूपाधिस्मरणादिकियादिः नन्वानुमानिति सर्वत्रासम्भावादित्यर्थः अवगतइति महानसइत्यासिद्धि स्वरूपकीर्तनमात्रं
त्यादिः महत्त्वादयो योग्यो ऽनुपसामान्यवत्त्वादिवयोग्यवक्तोतादृशप्रतियोगित्वसामान्यलक्षणामत्वान्योन्याभावयोर्योग्यतादिति भावः नप्रतियोगितावच्छेदकमिति तद्धूमसामान्यसमानाधि
करणतादृशाभावप्रतियोगितासामान्यावच्छेदकमित्यर्थः अथ साधनाव्यापकव्याप्यत्वाभावः साध्येऽधिकरणस्वरूपमेव एवं साधनानिष्ठसाध्यसंबन्धे साधनतावच्छेदकातिरिक्तावच्छेदकता
वे पीत्यनुशयानोपेयेन रूपेण ज्ञाताव्याप्तिरनुमितेस्तंतद्रूपविशिष्टानसन्निकर्षेण गम्या सामानाधिकरण्यमात्रस्य तु तथात्वं न व्यवस्याम इत्याशयेनाह किं चेति विशेषणज्ञानसाध्यतावत्ता
मग्रीसाध्यत्वाद्वा नचेति उपलक्षणमेतत् उपाधेरयोग्यस्यापि संभवादुपाधिसामान्यतद्धेतोर्मूलादिसामान्यतद्धेतोरिवात्यंतान्योन्याभावयोरयोग्यतया अप्रत्यक्षत्वेनाग्रहीतत्वमप्रामाण्यात् नचयोग्यो
पाधिव्यतिरिक्तस्य रूपवानुमानोगं अयोग्योपाधिग्रहे पानुमितिप्रसंगात् यथायोग्यान्याभावयोरयोग्यतयाप्रत्यक्षेणाग्रहीतत्वमप्राप्यत्वाद्व्यक्तरूपयति यद्वोक्तमित्यादिना व्यभिचारेत्यादि अन्वय
त्वसंग्राह्यसंशयस्यापि प्रतिबन्धकमाह त्वमव्यभिचारशंका यावत्तथात्वाभिधानात् अन्यथा तु तत्साधारणतत्कारणमेलकरणसामग्रीप्रतिबन्धिकाबोध्या विवेचितं च प्रत्यक्षमणिदीधितौ कस्य
तेनाधिकानुपरिहार अत्र तत्र यद्यपि साधनस्य साध्याभाववद्वृत्तित्वग्रहाभावो हेतुरिति नयुक्तम् केवलान्वयिनि तथाप्रसिद्ध्या प्रत्यप्रसिद्धेः दंडशः प्रसिद्धो ऽपि तादृशभ्रमसंभवे ऽपि सर्वत्र त
थाभ्रमे मानाभावात् अतएव साध्यतावच्छेदकगोचरसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहो ऽपि प्रयुक्तः सकलसाध्यतावच्छेदकेतादृशभ्रमे मानाभावात् तथापि साध्यतावच्छे
देनत्वरूपीयतादृशावच्छेदकत्वग्रहस्य विषयतया ऽभावत्वादिविषयतयाभावो वा तत्स्वरूपीयव्याप्तिग्रहे हेतुः वस्तुतो व्याप्तेः साध्यसाधनभेदेन भिन्नतया विशिष्यैव कार्यकारणभावः तथा च यत्र साधनं साध्या
भाववद्वृत्ति साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगितावच्छेदकमेकविधमेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायोगं तदभावः स्वरूपविशिष्टव्याप्तिग्रहे हेतुः अतएवैकविधव्यभिचारज्ञानं विरहे ऽन्य
विधव्यभिचारग्रहाद्व्याप्तिधीविरोधः एवं चैकविधव्यभिचारज्ञानस्याप्रसिद्धावन्यतदभावस्य हेतुत्वे ऽपि न क्षतिः प्रसिद्धायाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः समानविषयतया तदभाववोधे तिरोधि
त्वानुरोधेन तत्तयाकल्पने तु वयं वारयामो यादि तत्स्वरूपकारादिविनिवेशोनविशेषेन पर्यवसितइति दिक् । व्याप्तिश्च धूमादिव्यापकवह्निसामानाधिकरण्यरूपा त्रिधूमत्वादिकं तादृशसामानाधिकरण्यसहकृतभाति
साधारण्येन अत्र च व्यापकतांशग्रहे व्यभिचारग्रहः समानाधिकरणधूमत्वांशग्रहे विशेषणतया सामानाधिकरण्यस्य ग्रहे हेतुरितिमंतव्यं साध्यसंबंधितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे विरोधिप
णतया संबंधस्य ग्रहे हेतुरित्यपि केचित् यत्र विरुद्धे सद्व्यभिचारे भ्रमेण व्यापकत्वभ्रमदर्शनात्सामान्यतएव सद्व्यभिचारज्ञानं हेतुरिति तन्न असिद्धत्वात् विरुद्धे ऽपि व्यापकत्वसामानाधिकरण्ययोर्ग्राह
कसामग्रीक्रमयौगपद्याधीनं ग्रहणक्रमयौगपद्यं तत्र मिथः कार्यकारणभावग्रहइति इदमुत्तरत्वधेयम् यथा विद्यमानमपि वह्नित्वं व्यवहितविप्रकृष्टासभादिदेशनिष्ठाभावप्रतियोगितावच्छेद
कत्वेन गृह्यते ऽभावदेशविप्रकर्षादिना ग्राहकाभावात् तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेपग्रहसंभवात् नानुपलब्धेः प्रतियोगिसत्त्वविरोधित्वादिलक्षणायोग्यत्वेनेति न तत्सामा
न्याभावो लौकिकप्रत्यक्षागम्यः परं त्वकस्यचिद्विशेषस्य स्फुरणवशाद्धूमत्वादौ गृहीतो धूमवन्निष्ठात्यंताभावप्रतियोगितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्यादया गृह्यते अतएवानुमानादिना व्यभिचा
रग्रहे ऽपि न व्याप्तिधीः निर्णयात्मनि साधारणो वा दोषविशेषाजन्योपनीतभाने संशयादिसाधारणस्य निश्चयात्मनो वा विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वात् तत्र धूमादौ देशांतरवृत्तित्वसंभावनादि
रहादिवशाद् धूमाणेव क्वाद्यभाववद्वृत्तिताभावो धूमत्वाद्यवच्छेदेन गृह्यते ताद्रूप्यापि वदंति इत्याशंकरासभादिपदार्थसार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानो
वश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य संदिह्ये किमेतानि सर्वाण्येव कारणानि किं वा कानिचिदन्यथा कानिचिन्नेति तत्र च यस्य व्यतिरेके ऽपि इतरेभ्यस्तथाविधेभ्यो धूमो ऽनुत्पत्तिमनुपलभते न स्यादेत
त्वमवधारयति यथा रासभादेः यस्य च व्यतिरेके तादृशा परस्तु कलान्वयेऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वह्नेः तत्र चाकारणत्वसंदेहो विरोधितामासादयन् येन त